# gaurIgirIshastotram

# ગૌરીગિરીશસ્તોત્રમ્

## Document Information

Text title : gaurIgirIshastotram

File name : gaurIgirIshastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : January 19, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# ગૌરીગિરીશસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।

ચન્દ્રાર્ધપ્રવિભાસિમસ્તકતટૌ તન્દ્રાવિહીનૌ સદા
    ભક્તૌઘપ્રતિપાલને નિજતનુછાયાજિતાર્કાયુતૌ ।
શૃઙ્ગાદ્રિસ્થવિવાહમણ્ડપગતૌ કારુણ્યવારાન્નિધી
    કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૧॥

અન્યોન્યાર્ચ્યનતત્પરૌ મધુરવાક્સન્તોષિતાન્યોન્યકૌ
    ચન્દ્રાર્ધાઞ્ચિતશેખરૌ પ્રણમતામિષ્ટાર્થદૌ સત્વરમ્ ।
શૃઙ્ગાદ્રિસ્થવિવાહમણ્ડપગતૌ શૃઙ્ગારજન્માવની
    કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૨॥

સૌદર્યેણ પરસ્પરં પ્રમુદિતાવન્યોન્યચિત્તસ્થિતૌ
    રાકાચન્દ્રસમાનવક્ત્રકમલૌ પાદાબ્જકાલઙ્કૃતૌ ।
શૃઙ્ગાદ્રિસ્થવિવાહમણ્ડપગતૌ ગઙ્ગાતટાવાસિનૌ
    કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૩॥

સિંહોક્ષાગ્ર્યગતી મહોન્નતપદં સમ્પ્રાપયન્તૌ નતા-
    નંહોરાશિનિવારણૈકનિપુણૌ બ્રહ્મોગ્રવિષ્ણ્વર્ચિતૌ ।
શૃઙ્ગાદ્રિસ્થવિવાહમણ્ડપગતૌ ગાઙ્ગેયભૂષોજ્જ્વલૌ
    કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૪॥

કસ્તૂરીઘનસારચર્ચિતતનૂ પ્રત્યૂયમાનૌ સુરૈ-
    રસ્તૂક્ત્યા પ્રણતેષ્ટપૂરણકરૌ વસ્તૂપલબ્ધિપ્રદૌ ।
શૃઙ્ગાદ્રિસ્થવિવામણ્ડપગતાવઙ્ગાવધૂતેન્દુભૌ
    કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૫॥

વાણીનિર્જિતહંસકોકિલરવૌ પાણીકૃતામ્ભોરુહૌ
    વેણીકેશવિનિર્જિતાહિચપલૌ ક્ષોણીસમાનક્ષમૌ ।
શૃઙ્ગાદ્રિસ્થવિવાહમણ્ડપગતૌ તુઙ્ગેષ્ટજાલપ્રદૌ

કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૬॥

કામાપત્તિવિભૂતિકારણદશૌ સોમાર્ધભૂષોજ્જ્વલૌ
સામામ્નાયસુગીયમાનચરિતૌ રામાર્ચિતાઙ્ઘ્રિદ્વયૌ ।
શ‍ૃઙ્ગાદ્રિસ્થવિવામણ્ડપગતૌ માણિક્યભૂષાન્વિતૌ
કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૭॥

દમ્ભાહઙ્કૃતિદોષશૂન્યપુરુષૈઃ સમ્ભાવનીયૌ સદા
જમ્ભારાતિમુખામરેન્દ્રવિનુતૌ કુભાત્મજાદ્યર્ચિતૌ ।
શ‍ૃઙ્ગાદ્રિસ્થવિવાહમણ્ડપગતૌ વાગ્દાનદીક્ષાધરૌ
કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૮॥

શાપાનુગ્રહશક્તિદાનનિપુણૌ તાપાપનોદક્ષમૌ
સોપાનક્રમતોઽધિકારિભિરનુપ્રાપ્યૌ ક્ષમાસાગરૌ ।
શ‍ૃઙ્ગાદ્રિસ્થવિવાહમણ્ડપગતૌ લાવણ્યપાથોનિધી
કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૯॥

શોણામ્ભોરુહતુલ્યપાદયુગુલૌ બાણાર્ચનાતોષિતૌ
વીણાધૃઙ્મુનિગીયમાનવિભવૌ બાલારુણાભામ્બરૌ ।
શ‍ૃઙ્ગાદ્રિસ્થવિવામણ્ડપગતૌ તુલ્યાધિકૈર્વર્જિતૌ
કલ્યાણં તનુતાં સમસ્તજગતાં ગૌરીગિરીશૌ મુદા ॥ ૧૦॥

ઇતિ ગૌરીગિરીશસ્તોત્રં સમ્પૂર્ણમ્ ॥

*gaurIgirIshastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*